# Shri Durgastavah

# श्रीदुर्गास्तवः

## Document Information

Text title : durgAstavaH

File name : durgAstavaH.itx

Category : devii, sachchidAnanda-shivAbhinava-nRisiMhabhAratI, devI, durgA

Location : doc_devii

Author : Sachchidananda Shivabhinava Nrisimha Bharati Swamigal

Proofread by : PSA Easwaran psawaswaran at gmail.com

Latest update : November 9, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# श्रीदुर्गास्तवः

एतावन्तं समयं सर्वापद्भ्योऽपि रक्षणं कृत्वा ।
ग्रामस्य परमिदानीं ताटस्थ्यं केन वहसि दुर्गाम्ब ॥ १॥

अपराधा बहुशः खलु पुत्राणां प्रतिपदं भवन्त्येव ।
को वा सहते लोके सर्वांस्तान्मातरं विहायैकाम् ॥ २॥

मा भज मा भज दुर्गे ताटस्थ्यं पुत्रकेषु दीनेषु ।
के वा गृह्णन्ति सुतान्मात्रा त्यक्तान्वदाम्बिके लोके ॥ ३॥

इतः परं वा जगदम्ब जातु ग्रामस्य रोगप्रमुखापदोऽस्य ।
न स्युस्तथा कुर्वचलां कृपामित्यभ्यर्थनां मे सफलीकुरुष्व ॥ ४॥

पापहीनजनतावनदक्षाः सन्ति निर्जरवरा न कियन्तः ।
पापपूर्णजनरक्षणदक्षांस्त्वां विना भुवि परान्न विलोके ॥ ५॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितः श्रीदुर्गास्तवः सम्पूर्णः ।

Proofread by PSA Easwaran

*Shri Durgastavah*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*